## हलादिः शेषः। (६०/२१७९)

अभ्यासस्य हलादिः शिष्यते, अनादिर्लुप्यते। जग्लौ। [1]मम्लौ। पपाच। पपाठ। [2]आट, आटतुः, आटुः। आदिशेषनिमित्तोऽयमनादेर्लोपो विधीयते, तत्राभ्यासजातेः आश्रयणात् क्वचिदपि वर्तमानो हलादिः अनादेः सर्वत्र निवृत्तिं करोति। अपरे तु ब्रुवते, शेषशब्दोऽयं निवृत्त्या विशिष्टमवस्थानमाह। तदवस्थानम् [3]उक्तितो यद्यपि प्रधानम्, अविधेयत्वात् तु तदप्रधानम्। निवृत्तिरेव तु विधेयत्वात् प्रधानम्। तत्रायमर्थोऽस्य जायते, अभ्यासस्य अनादेर्हलो निवृत्तिः भवति इति। सा किमिति आदेरविधेयां सतीमनिवृत्तिमपेक्षिष्यते इति॥

## शर्पूर्वाः खयः। (६१/२२५९)

[4]अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते, अन्ये [5]हलो लुप्यन्ते। [6]चुश्च्योतिषति। तिष्ठासति। पिस्पन्दिषते। शर्पूर्वाः इति किम्? पपाच[7]। खयः इति किम्? सस्नौ।

[८७८] खर्पूर्वाः [8]खय इति[9] वक्तव्यम्। (म.भा.३.३५३)

उचिच्छिषति इत्यत्र उच्छेः अन्तरङ्गत्वात् तुकि कृते द्विर्वचनम्, [10]तत्र हलादिः शेषे (७.४.६०/२१७९) सति अभ्यासे तकारः [11]श्रूयेत॥

## कुहोश्चुः। (६२/२२४८)

[12]अभ्यासस्य कवर्गहकारयोः चवर्गादेशो भवति। चकार। चखान। जगाम। [13]जघान। [14]हकारस्य – जहार। जिहीर्षति। जहौ॥

## न कवतेर्यङि। (६३/२६४१)

कवतेः अभ्यासस्य यङि परतः [15]चुः न भवति। कोकूयते उष्ट्रः। कोकूयते स्वरः। कवतेः इति विकरणनिर्देशः कौतेः[16] कुवतेश्च[17] निवृत्त्यर्थः। तयोः चुत्वमेव भवति। चोकूयते[18]। यङि इति किम्? चुकुवे॥

## कृषेश्छन्दसि। (६४/३५९९)

कृषेः छन्दसि विषये यङि परतः अभ्यासस्य चुः न भवति। करीकृष्यते [19]यज्ञकुणपः। छन्दसि इति किम्? चरीकृष्यते [20]कृषीवलः॥

---

1. उदाहरणमिदं नास्ति क. इ. 2. उदाहरणमिदं नास्ति ह. 3. उक्तितो नास्ति ब, 4. शेषे इति वर्तते इत्यधिकम् ह. 5. हलो नास्ति ब. 6. च्युतिर् क्षरणे इत्यधिकम् ह. 7. पपाठ इत्यधिकम् ब. 8. खयः ब. ड, नास्ति इ. 14. हकारस्य नास्ति ब. 15. चवर्गादेशः इ. 16. अदादिकस्य इत्यधिकम् इ. 17. तौदादिकस्य त्यधिकम् इ. 18. यङ्लुकि चोकवीति इत्यधिकम् इ. 19. यज्ञकुणपः नास्ति इ. 20. कृषीवलः नास्ति ब.